पराम्नलोलुपा नित्यं तपोव्रतपराङ्मुखाः।
पाषण्डसङ्गलुब्धाश्च भविष्यन्ति कलौ युगे॥
वित्तार्थं ब्राह्मणाः केचिन्महाकपटधर्म्मिणः।
वल्काधरा भविष्यन्ति जटिलाः श्मश्रुधारिणः।
कलौ युगे भविष्यन्ति ब्राह्मणाः शूद्रधर्म्मिणः॥
शूद्राश्च दीक्षागुरवो नित्यं ब्राह्मणधर्म्मिणः।
कलौ यास्यन्ति निर्वृत्ता उत्तमा अपि नीचताम्॥
नीचाश्च धनसम्पन्ना यास्यन्त्युच्चपदं प्रति।
प्रदास्यन्त्युपकारिभ्यो दानानि सकला जनाः॥
यत्नादपि च नेच्छन्ति वृषला विप्रवर्त्तनम्।
मित्रस्नेहाद्दहिष्यन्ति कुसाध्यश्च कलौ जनाः॥
अधर्म्मबुद्धिदातारो धर्म्मबुद्धिविलोपिनः।
परोक्षनिन्दकाः क्रूराः संमुखप्रियवादिनः॥
परस्त्रीहिंसकाश्चैव मिथ्यावचनभाषिणः।
भविष्यन्ति कलौ विप्राः परवित्ताभिलाषिणः॥
गृहमायान्तमतिथिं समाराध्य विधानतः।
धनलोभाद्धनिष्यन्ति नरा नरकभागिनः।
ऋणोपजीविनश्चैव भविष्यन्ति कलौ युगे॥
स्त्रीजिताः पुरुषाः सर्व्वे स्त्रियोऽप्यत्यन्तचञ्चलाः।
दुर्नीतिर्व्वाधते तासां स्वामिनश्च न संशयः॥
जैमिनिरुवाच।
मनःशुद्धिविहीनत्वात् सर्व्वेषां प्राणिनां मुने!।
अतः सर्व्वं त्वया प्रोक्तं मनो विस्मयदं मम॥
कलौ सर्व्वे भविष्यन्ति मनःशुद्धिविवर्जिताः।
तेषां यथा भवेत् कर्म्म सफलं ब्रूहि तद्गुरो!॥
व्यास उवाच।
अनर्पितन्तु यत् कर्म्म तद्भवेन्निष्फलं खलु।
एकेन मनसा विप्र! सुदृढं कथ्यते मया॥
विष्णुभक्तिमतां पुंसां न किञ्चिदफलं भवेत्।
इति ते कथितं सर्व्वं यत्तं ब्राह्मणसत्तम!।
यत् श्रुत्वा भक्तिभावेन नरो मोक्षमवाप्नुयात्॥"
इति पाद्मे क्रियायोगसारे २५ अध्यायः॥*॥
अपि च।
"कृते धर्म्मश्चतुष्पाच्च सत्यं दानं तपो दया।
धर्म्मपाता हरिः श्वेतः सन्तुष्टा ज्ञानिनो नराः।
चतुर्व्वर्षसहस्राणि नरा जीवन्ति वै तदा॥
कृतान्ते क्षत्रियैर्विप्रा विट्शूद्राश्च जिता द्विजैः।
शूरस्य ख्यातिः पुत्रो विष्णुः चक्रं जघान ह॥*॥
त्रेतायुगे त्रिपाद्धर्म्मः सत्यदानदयात्मकः।
नरा यज्ञपरास्तस्मिंस्तथा क्षत्रोद्भवं जगत्॥
रक्तो हरिर्नरैः पूज्यो [ ]दशशतायुषः।
तत्र विष्णुर्भीमरथः क्षत्रियो राक्षसानहन्॥*॥
द्विपाच्च द्वापरे धर्म्मः पीतताञ्चाच्युते गते।
चतुःशतायुषो लोका द्विजक्षत्रोत्तराः प्रजाः॥
तदा दृष्ट्वाल्पबुद्धींश्च विष्णुर्व्यासस्वरूपधृक्।
तदेकन्तु यजुर्व्वेदं चतुर्धा विभजत् पुनः॥
शिष्यानध्यापयामास नामतस्तान्निबोध मे।
ऋग्वेदमथ पैलञ्च सामवेदञ्च जैमिनिम्॥
अथर्व्वाणं सुमन्तुन्तु यजुर्व्वेदं महामुनिम्।
वैशम्पायनसंज्ञन्तु पुराणं सूतमेव च॥
अष्टादश पुराणानि येषु वै हरिरेव हि।
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च॥
वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम्॥
ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतन्तथा।
भविष्यं नारदीयञ्च पुराणञ्चेति विस्तरम्॥
मार्कण्डेयं तथाग्नेयं ब्रह्मवैवर्त्तमेव च।
कौर्म्मं मात्स्यं गारुडञ्च वायवीयमनन्तरम्॥
अष्टादशं समुदितं ब्रह्माण्डमिति संज्ञितम्।
अन्यान्युपपुराणानि मुनिभिः कथितानि तु॥
आद्यं सनत्कुमारोक्तं नारसिंहमथापरम्।
तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम्॥
चतुर्थं शिवधर्म्माख्यं साक्षान्नन्दीशभाषितम्।
दुर्व्वाससोक्तमाश्चर्य्यं नारदोक्तमतः परम्॥
कापिलं वामनञ्चैव तथैवोशनसेरितम्।
ब्रह्माण्डं वारुणञ्चाथ कालिकाह्वयमेव च॥
माहेश्वरं तथा शाम्बं सौरसर्व्वार्थसञ्चयम्।
पराशरोक्तमपरं मारीचं भार्गवाह्वयम्॥
पुराणं धर्म्मशास्त्रञ्च वेदा अङ्गानि यन्मुने!।
न्यायः शौनक! मीमांसा आयुर्व्वेदार्थशास्त्रकम्।
गान्धर्व्वञ्च धनुर्व्वेदो विद्या ह्यष्टादश स्मृताः।
द्वापरान्ते स च हरिर्भुवो भारमपाहरत्॥*॥
एकपादस्थिते धर्म्मे कृष्णताञ्चाच्युते गते।
जनास्तदा दुराचारा भविष्यन्ति च निर्दयाः॥
सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः।
कालसञ्चोदितास्तेऽपि परिवर्त्तन्त आत्मनि॥
प्रभूतञ्च यदा सत्त्वं मनोबुद्धीन्द्रियाणि च।
तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रतिः॥
यदा कर्म्मसु काम्येषु भक्तिर्यशसि देहिनाम्।
तदा त्रेता रजोवृत्तिरिति जानीहि शौनक!॥
यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः।
कर्म्मणाञ्चापि काम्यानां द्वापरन्तद्रजस्तमः॥
यदा सदानृतं तन्द्रीनिद्राहिंसादिसाधनम्।
शोकमोहभयं दैन्यं स कलिस्तु तदा स्मृतः॥
यस्मिन् जनाः कामिनोऽपि शश्वत्कटुकभाषिणः।
दस्युकृष्टा जनपदा वेदाः पाषण्डदूषिताः॥
राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः।
अव्रता वटवोऽशौचा भिक्षवश्च कुटुम्बिनः॥
तपस्विनो ग्रामवासा न्यासिनो नित्यलोलुपाः।
ह्रस्वकाया महाहाराश्चौर्य्यमायोरुसाहसाः॥
त्यक्ष्यन्ति भृत्याश्च पतिं भृत्यं भर्त्तार एव च।
शूद्राः प्रतिग्रहीष्यन्ति तपोवेशोपजीविनः॥
उद्विग्नाश्चानलङ्काराः पिशाचसदृशाः प्रजाः।
अस्नातभोजनैर्नाग्निदेवतातिथिपूजनम्।
करिष्यन्ति कलौ प्राप्ते न च पिण्डोदकक्रियाम्॥
स्त्रीपराश्च जनाः सर्व्वे शूद्रप्रायाश्च शौनक!।
बहुप्रजाल्पभाग्याश्च भविष्यन्ति कलौ स्त्रियः॥
शिरःकण्डूयनपरा आज्ञां भेत्स्यन्ति सत्पतेः।
विष्णुं न पूजयिष्यन्ति पाषण्डोपहता जनाः॥
कलेर्दोषनिधेर्विप्र अस्ति ह्येको महान् गुणः।
कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत्॥
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतः फलम्।
द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात्॥
तस्माज्ज्ञेयो हरिर्नित्यं ध्येयः पूज्यश्च शौनक॥"
इति गारुडे युगधर्म्माः। २२७ अध्यायः।

युगः, पुं, (युज्येते वलीवर्द्दौ अस्मिन्निति। युज्+घञ्। युजेर्घञन्तस्य निपातनादगुणत्वम्। इति काशिका। ६। १। १६०।) रथहलाद्यङ्गम्। इति मेदिनी। गे, १८॥ जोयालि इति भाषा। (यथा,—

"नावेव नः पारयतं युगेव
नभ्येव न उपधीव प्रधीव॥"

इति ऋग्वेदे। २। ३६। ४॥

"युगा इव यथा रथस्य युगे नभ्या इव।" इति तद्भाष्ये सायणः॥ तथा च कथासरित्सागरे। ६०। १२।

"तस्यैकदा वणिज्यार्थं गच्छतो मथुरां पुरीम्।
भारवोढ़ा युगं कर्षन् भारेण युगभग्नतः॥")

युगकीलकः, पुं, (युगस्य कीलकः।) युगकाष्ठस्य कीलकः। जोयालेर खिल इति भाषा। तत्पर्य्यायः। शम्या २। इत्यमरः। २।८।१४॥

युगन्धरः, पुं, (युगं धारयतीति। धारि+"संज्ञायां भृतॄवृजिधारिसहितपिदमः।" ३।२।४६। इति खच्। "अरुर्द्विषदजन्तस्य मुम्।" ६।३।६७। इति मुम्।) यत्र रथस्य युगकाष्ठमासज्यते तत्र। रथस्याग्रा यत्र बध्नन्ति तद्युगकाष्ठं तद्युगं धरति युगन्धरः। इति भरतः॥ तत्पर्य्यायः। कूबरः २। इत्यमरः। २। ८। ५७॥ पर्व्वतविशेषः। यथा,—

"निषधो माल्यवान् विन्ध्यो हेमकूटो युगन्धरः॥"

इति शब्दरत्नावली॥

(तूणिपुत्रः। स च सात्यकेः पौत्रः। यथा, हरिवंशे। १६०। ३१।

"तूणेर्युगन्धरः पुत्त्र इति वंशः समाप्यते॥")

युगपत्, व्य, एकदा। एककालीनम्। इत्यमरः। ३। ४। २२॥ (यथा, भागवते। ३। ६। २।

"कालसंज्ञां तदा देवीं बिभ्रच्छक्तिमुरुक्रमः।
त्रयोविंशतितत्त्वानां गणं युगपदाविशत्॥")

युगपत्रः, पुं, (युगं पत्रमस्य।) कोविदारवृक्षः। इति हेमचन्द्रः। ४।११८॥ युग्मपर्णवृक्षमात्रञ्च॥

युगपत्रकः, पुं, (युगपत्र+स्वार्थे कन्।) कोविदारवृक्षः। इत्यमरः। २।४।२२॥ (यथास्य पर्य्यायः।

"कोविदारश्चमरिकः कुद्दालो युगपत्रकः।
कुण्डली ताम्रपुष्पश्च अश्मन्तकः स्वल्पकेशरी॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

युगपत्रिका, स्त्री, (युगं पत्रमस्याः। कप्। टाप्। अकारस्येत्वञ्च।) शिंशपावृक्षः। इति त्रिकाण्डशेषः॥ (विवरणमस्याः शिंशपाशब्दे ज्ञातव्यम्॥)

युगपार्श्वगः, पुं, (युगस्य पार्श्वं गच्छतीति। गम्+डः।) अभ्यासार्थं लाङ्गलपार्श्वबद्धो गौः। पाँटे वाँधा गरु इति भाषा। तत्पर्य्यायः। प्रष्ठवाट् २। इत्यमरः। २। ९। ६३॥

युगलं, क्ली, (युज्यते परस्परं संगच्छत इति। युज्+वृषादिभ्यः कलच्। न्यङ्क्वादित्वात् कुत्वम्।) युग्मम्। इत्यमरः। २।५।३८॥ (यथा, भागवते। ४। २६। २०।

"पत्यर्ध्यं पादयुगलमाह चोत्सङ्गलालिताम्॥")